# Shri Indrakshi Sahasranama Stotram

# શ્રીઇન્દ્રાક્ષીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Indrakshi Sahasranama Stotram

File name : indrAkShIsahasranAmastotram.itx

Category : devii, otherforms, devI, sahasranAma

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Description-comments : Rudrayamala, See corresponding nAmAvalI

Latest update : January 22, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# શ્રીઇન્દ્રાક્ષીસહસ્રનામસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ।
ૐ નમોદેવ્યૈ ।
દેવ્યુવાચ -
ભગવન્સર્વલોકેશ ભક્તાનામુપકારક ।
ઇન્દ્રાક્ષ્યા ઇષ્ટદેવ્યાશ્ચ વદ નામસહસ્રકમ્ ॥ ૧॥

ભૈરવ ઉવાચ -
યા દેવી વિષ્ણુમાયેતિ વિખ્યાતા સર્વજન્તુષુ ।
સૈવેન્દ્રાક્ષી પરા દેવી વજ્રહસ્તા પરાત્મિકા ॥ ૨॥

લોકેશ્વરી મહાવિદ્યા સદા ચૈતન્યરૂપિણી ।
અષ્ટાવિંશાક્ષરી વિદ્યા મહાશ્રીષોડશાક્ષરી ॥ ૩॥

તસ્યા નામ્નાં સહસ્રં ચ વક્ષ્યામિ સર્વભૂતયે ।
અસ્ય શ્રી ઇન્દ્રાક્ષીનામસહસ્રસ્ય ભગવાન્સદાશિવ ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । ષોડશાક્ષરી દેવતા ।
હ્રીં બીજં, સૌઃ શક્તિઃ, ક્લિં કીલમકમ્ ।
અશેષપ્રત્યહશમનાર્થે સર્વકામાવાપ્ત્યર્થે પાઠે વિનિયોગઃ ॥

ૐ હ્રીં શ્રીં વજ્રહસ્તા ઐં સૌઃ ક્લીં વજ્રિસમર્ચિતા ફટ્ સ્વાહા ।
ૐ વજ્રિણી વાણી વૈધસી વિદ્યુદીશ્વરી ।
ઈશાની શાङ્કરી શાન્તિઃ શક્તિશ્ચ ભ્રુકુટિઃ કુટી ॥ ૧॥

શાન્તા ભ્રાન્તિર્ભવાની ચ ભીમા ભીતા ભયાનકા ।
ચિત્રા વિચિત્રા વિજયા વિશ્વેશી વિશ્વનાયકા ॥ ૨॥

વિદ્યા વિનાયકી વીણાવેણુહસ્તા વિભાવિનિ ।
વિસ્મયા સ્મયકર્ત્રી ચ વિમાનગતિશામિની ॥ ૩॥

વૈમાનિકેશી વશિની વાગ્ભવી વીરસુન્દરી ।

વૈતાલિકી કેલીરતા કમલા કમલાશ્રિતા ॥ ૪॥

કામેશ્વરી રતિઃ પ્રીતી રતિલીલા લલદ્રસા ।
લાઙ્ગલીશા લલત્રાસા નામમૌક્તિકરાજિતા ॥ ૫॥

નામ્ના નારી નમસ્તુત્યા સ્તુતિતુષ્ટાઽતુલપ્રભા ।
પ્રેમકર્ત્રી જગત્સ્તુત્યા જ્વાલામણ્ડિતશેખરા ॥ ૬॥

જ્વાલામુખી જયકરી જયદા વિજયેશ્વરી ।
વિનતા વેનરોષ્ટા ચ વૈનતેયધજાશ્રયા ॥ ૭॥

ધ્વજિની રથગા રથ્યા પથ્યા પ્રીતનસન્નિભા ।
કસ્તૂરીરસરમ્યાઙ્ગી કર્પૂરધવલા શુચિઃ ॥ ૮॥

શુચિસ્મિતા હાસ્યમુખી ક્રોધિની ક્રોધવિટ્કલા ।
ક્રિમિહા ક્રમગા ક્રાન્તા કાયક્લેશવિવર્જિતા ॥ ૯॥

વાનીરતલગા વેણુર્વૈરોચનિભયાપહા ।
વિભાકરપ્રભા વેત્રધારિણી સર્પહારિણી ॥ ૧૦॥

સર્પાશનગતિર્ગીતા ગાયત્રી ગોર્ગરીયસી ।
ગોપ્ત્રી સર્વમુખી સત્યા સામગાનરતા રસા ॥ ૧૧॥

રમા રેતઃપ્રભાવજા રેતસ્તુષ્ટા રજસ્વલા ।
રાત્રિઞ્ચરી રજઃશાન્તા રાજસી રેવતી રુચિઃ ॥ ૧૨॥

રાત્રિરુજાપહા રામા શ્યામશ્યામશમીલતા ।
શામ્ભવી શર્વરી શોભા શર્વરી શર્વસેવિતા ॥ ૧૩॥

શશાઙ્કમુકુટા શાન્તિઃ શશાઙ્કાગ્ન્યર્કલોચના ।
શારદા શારદામ્ભોજદલાક્ષી દમકારિણી ॥ ૧૪॥

દામોદરપ્રિયા દેવી દેવકી દેવમાનિતા ।
દયાવતી દયાકર્ત્રી દેવસૂર્દેવવન્દિતા ॥ ૧૫॥

ધૃતિર્ધરા ચ ધરણી ધરણીધરપુત્રિણી ।
દસ્યુહા દસ્યુજનની દસ્યુભીતિહરા હવિઃ ॥ ૧૬॥

હવિષ્યા હરિસેવ્યા ચ હરિપત્ની હરાર્ચિતા ।
હાટકેશી હલધરા હાલાહલસદાલસા ।
મોદકી મોદિની માન્યા મુરુપ્રસૂવિભૂષણા ॥ ૧૭॥

મન્ત્રાવલિર્મહામાયામોચિની પાપમોચિની ।
માનદા પ્રાણદા પ્રીતા પ્રેતવાહા પ્રજાવતી ॥ ૧૮॥

પ્રોત્તુઙ્ગકુચશોભાઢ્યા ઢુલ્લદમ્ભોજલોચના ।
સરસી સરસા સાધ્વી સમસ્તદુરિતાપહા ॥ ૧૯॥

કોકિલા કાલવરદા કલાન્તકફલાવલીઃ ।
કોટરા કામિની કામ્યા કરાલવદના કૃશા ॥ ૨૦॥

કૃશાઙ્ગી કૃષિરુગ્રાસ્યા સરિત્સાગરપુત્રિણી ।
સત્યામભિકસેવ્યા ચ સતાનકતલસ્થિતા ॥ ૨૧॥

વિદ્યાવિનયદા લોલા લક્ષ્મી લભ્યા લયપ્રદા ।
લૂતા લાસ્યરતા લાજા લક્ષ્મીનાથસમર્ચિતા ॥ ૨૨॥

અક્ષતા ત્ર્યક્ષિણી તારા ત્રિપુરા ત્રિપુરધ્વની । (ત્રિપુરેશ્વરી)
ઉગ્રતારા જટાજૂટા ધારિણી જમ્બુસન્નિભા ॥ ૨૩॥

જામ્બૂનદપ્રભા જેયા જ્યેષ્ઠા શ્રેષ્ઠા જલન્ધરા ।
જાગ્રતી ચ સુષુપ્તિશ્ચ જયમણ્ડિતમૂર્ધજા ॥ ૨૪॥

જગત્પ્રસૂર્જગત્પ્રીતા પ્રેતરાજક્ષયઙ્કરી ।
પરા પુણ્યપ્રદા પ્રેતા ત્રયીમૂર્તિસ્ત્રયીતનુઃ ॥ ૨૫॥

ત્રયીતનુનિભા ત્ર્યાશ્રા ત્ર્યક્ષરી તારિણીતનુઃ ।
તન્વી ત્રિપુરમાતા ચ ત્રિનેત્રા ત્રિપુરોત્તમા ॥ ૨૬॥

ત્રિવર્ગફલદાતા ચ તોતલાઽતુલવિક્રમા ।
ત્રિવિક્રમપ્રસૂસ્ત્ર્યન્તા ત્રયી ત્રિપુરભૈરવી ॥ ૨૭॥

શ્રીદા શ્રીધરપત્ની ચ શ્રીઃ શ્રીદાનકવિતૃદા ।
શ્રીદેવી ચ મહાલક્ષ્મીઃ સિદ્ધલક્ષ્મી સરસ્વતી ॥ ૨૮॥

બાલા બાલકતુષ્ટા ચ બાલા બાલ્યૈકસુન્દરી ।
બલીયસી ભલ્લહસ્તા બાલકેયા બલન્ધરા ॥ ૨૯॥

બલિતુષ્ટા બલિભુજા વરદા બાલકેશ્વરી ।
બન્ધુપ્રિયા વાન્ધવેશી બગલા વૈદવેશ્વરી ॥ ૩૦॥

બ્રહ્માસ્ત્રવિદ્યા જટિલા બ્રાહ્મણી ક્ષત્રિયીમયા ।

મારા પ્રલયકર્ત્રી ચ માતઙ્ગી મત્તમાનસા ॥ ૩૧॥

મત્તમાતઙ્ગગા મેધ્યા મુક્તિદા મેદિની મતિઃ ।
રાજમાતઙ્ગિનીમૂર્તિઃ રજોગુણવિભૂષણા ॥ ૩૨॥

રતિદા સ્મૃતિદા મથ્યા મેનકા માનવર્ધિની ।
સુન્દોપસુન્દમથની સ્વરૂપા ચ તિલોત્તમા ॥ ૩૩॥

રમ્ભા રમ્ભા ચ રમ્ભોરૂ સંરમ્ભા રમ્ભકારિણી ।
સદાનન્દા સદાતુષ્ટા સદારુષ્ટા સદાગતિઃ ॥ ૩૪॥

ચલકેશા ચલા ચાન્તા ચામીકરનિભાનના ।
ચ્યુતાઽચ્યુતપ્રિયા ચોલ્યા ચુલ્લી ચેટી ચ સત્કૃતિઃ ॥ ૩૫॥

ચારુરૂપા મહાચારા જૈનમાર્ગવિરોધિની ।
જનની જૈનજનની જૈનમાર્ગરસાલસા ॥ ૩૬॥

રામિકા રસસન્તુષ્ટા રસા રામૈકરોધિની ।
રસોલ્લાસા રસાસારસારિણી સ્મરકારિણી ॥ ૩૭॥

રાજ્ઞી રાજ્યપ્રદા રૌપ્યા રાજ્યદા ભોગવર્ધિની ।
ભગિની ભાગ્યદા ભોગા ભગમાલા ભગાત્મિકા ॥ ૩૮॥

ભીરુણ્ડા ભયભર્તાભા ભાવિભા ભીમરૂપિણી ।
ભયાનકમુખાભીષ્ટફલદા ફૈનિલાપ્રજા ॥ ૩૯॥

પીતામ્વરા પીતમુખી પતઙ્ગશતસન્નિભા ।
પતઙ્ગગામિની પીનકુચા કુષ્ઠક્ષયઙ્કરી ॥ ૪૦॥

વીરાત્મિકાન્તિકા ચાદ્યા વાગિલા વસુસુન્દરી ।
વાસવી વસુમાતા ચ વસુધા વાઙ્મયી વટુઃ ॥ ૪૧॥

વટુપ્રિયા વટુગતા વાચાઢ્યા વેશરૂપિણી ।
વારાહી વૈષ્ણવી યષ્ટિર્યક્ષિણી યદુનન્દિની ॥ ૪૨॥

યાદવેશી યજ્ઞકરી યાજ્ઞિકેષ્ટવરપ્રદા ।
યજ્ઞપ્રિયા યશોદા ચ યશોમાલા યશસ્વિની ॥ ૪૩॥

યાનવા યજુર્માતા ચ યાત્રા ચ યોગિની યવા ।
વામચારપ્રિયા વામાવાર્તા વાગ્વાદિની વસા ॥ ૪૪॥

યજ્ઞવારાહવરદા વામદેવી વસુન્ધરા ।
શારિકા શશિલેખા ચ શરદિન્દુશતપ્રભા ॥ ૪૫॥

મનોજવા મનોરૂપા મહોગ્રવપુષી વધૂઃ ।
શશિનેત્રા શિવા શૈની શિવવામાઙ્ગચારીણી ॥ ૪૬॥

ૐ હ્રીં શ્રીમમ્બિકાઽઽત્મીયા ચાદિદેવી મનોહરા ।
ઇષ્ટદાત્રીશ્વરી ચેશા ઈશાની ચેશ્વરપ્રિયા ॥ ૪૭॥

ઉમા ચોગ્રમુખી મોહ્યોરગભૂષણભૂષિતા ।
ઉન્નતા ચોન્નતકુચા ચોદયાચલસંશ્રયા ॥ ૪૮॥

ઉદિતાદિત્યસદૃશી ચ યોગફલદાયિની ।
ઉરુતન્વી તનુસ્તારા ચોષા બાણક્ષયઙ્કરી ॥ ૪૯॥

અનિરુદ્ધપ્રિયા ચોષા વેલા ચોષરમણ્ડલા ।
ઊષ્મોષ્મજ્વાલાનયના ઋજુર્યક્ષૈકસુન્દરી ॥ ૫૦॥

રૂપા ઋક્ષધ્વજેષ્ટા ચ ઊષ્મિણી ચોષ્મસુન્દરી ।
લિપ્સા લિપિર્લિપિકરી લીના લીલાલયસ્વરા ॥ ૫૧॥

એણાક્ષી ઐંસ્વરૂપાક્ષી ઐશ્વર્યાઽઽશ્ચર્યરૂપિણી ।
ઓઙ્કારપ્રભવા ચૌષ્ટા ચૌત્સવી ચોદયી વિધિઃ ॥ ૫૨॥

અમ્બા સુરેશ્વરી શુક્રા અઃસ્વરૂપૈકસુન્દરી ।
કાલિકા કનકપ્રીતા કાન્તિદા કામિની પ્રિયા ॥ ૫૩॥

કઠોરવપુષી કીલા કીલિતા કુબ્જરૂપિણી ।
કુબ્જિકા કૂવરી કુન્તા કેવલા કાન્તિસુન્દરી ॥ ૫૪॥

કામારિવરદા કાન્તિઃ કામેષ્ટા કીર્તિસુન્દરી ।
કારુકી કટુકી કીર્તિઃ કટુવાક્કટુચોષિણી ॥ ૫૫॥

કાલાન્તકજિતા કાલીકેશ્વરી કેશવપ્રિયા ।
ક્રીતા ક્રીતતપા  ક્રૂરા ક્રૂરેશી ક્રૂરસુન્દરી ॥ ૫૬॥

ક્રિયાવતી ક્રિયાકર્ત્રી ક્રિમિણી ક્રમુકપ્રિયા ।
કૂર્મેશ્વરી કૂર્મગતિઃ કૂર્મિણી કૂર્મરૂપિણી ॥ ૫૭॥

કારાકારૈકનિગડા કારેશી કારમોચિની ।
કકારવર્ણમાલા ચ કકારાક્ષરસુન્દરી ॥ ૫૮॥

ઐં સૌંઃ ખ્રીં ખેચરી ખાન્તા ખશી ખેટકરુપિણી ।
ખગામિની ખગગતિઃ ખગેશી ખગસુન્દરી ॥ ૫૯ ॥

ખગહસ્તા ખગાક્ષી ચ ખરૂપા ખેશસુન્દરી ।
ખકારરૂપિણી ખસ્થાખકારામૃતસુન્દરી ॥ ૬૦ ॥

ૐ હ્રીં શ્રીં ગં ગણેશાની ગુણિની ગુણસુન્દરી ।
ગુણિપ્રિયા ગજપતિર્ગજસ્થા ગજગામિની ॥ ૬૧ ॥

ગરી ગરિષ્ઠા ગુટિકા ગાનશ્રી ગીતસુન્દરી ।
ગયા ગીતપ્રિયા ગમ્યા ગુહ્યા ગુહ્યકસુન્દરી ॥ ૬૨ ॥

ગિરિજા ગિરિપૂજ્યા ચ ગિરાશી ગિરિસુન્દરી ।
ગ્રાહિણી ગૃહિણી ગમ્યા ગુહેશી ગુહસુન્દરી ॥ ૬૩ ॥

ગોર્ગવ્યા ગોમયી ગાન્તા ગોકારી ગોષ્ઠસુન્દરી ।
ગજાનનપ્રિયા ગ્રીવા ગોત્રેશી ગોત્રસુન્દરી ॥ ૬૪ ॥

ગ્રામિકા ગ્રહરૂપા ચ ગ્રહેશી ગ્રહસુન્દ્રરી ।
ગુહપ્રસૂર્યહાવાસા ગેહિની ગેહસુન્દરી ॥ ૬૫ ॥

ગણકા ગણકેશાની ગણેશા ગણસુન્દરી ।
ગણેશજનની ગોપી ગોપેશી ગોપસુન્દરી ॥ ૬૬ ॥

ગુહ્યકેષ્ટપ્રદા ગેયા ગગનાકારસુન્દરી ।
ઐં સૌંઃ ઘનાકૃતિર્ઘોષેશી ઘૌષસુન્દરી ॥ ૬૭ ॥

ઘર્ઘરા ઘર્ઘરીમૂર્તિઃ ઘટિકા ઘટસુન્દરી ।
ઘનસન્નિભમૂર્તિશ્ચ ઘવર્ણામૃતસુન્દરી ॥ ૬૮ ॥

ૐ હ્રીં શ્રીં ઙેં ઙાન્તવર્ણાઙ્ગા રોકરસુન્દરી ।
ૐ હ્રિં શ્રીં ચર્મવાસા ચ ચર્મિણી ચર્મસુન્દરી ॥ ૬૯ ॥

ચન્દ્રિકા ચન્દ્રવદના ચન્દ્રેશી ચન્દ્રસુન્દરી ।
ચરાચરજગત્સ્રષ્ટા ચારુણી ચારુસુન્દરી ॥ ૭૦ ॥

ચલાચલાચ્યુતકચાચ્યુતેશ્યચ્યુતસુન્દરી ।
ચુમ્બિની ચુલિકા ચારા ચુરેશી દૈત્યસુન્દરી ॥ ૭૧ ॥

ચલત્કનકકેયૂરા ચલત્કનકસુન્દરી ।

ૐ હ્રીં શ્રીં છિન્નમસ્તા ચ છિત્રાસ્યા છિત્રસુન્દરી ॥ ૭૨॥

છિત્રિકા છિત્રમુકુટા છકારાક્ષરસુન્દરી ।
ૐ જું સઃ હૌં જયાકારા જગતીધરસુન્દરી ॥ ૭૩॥

જગચ્છા ન્તા જગત્સ્રષ્ટા જગતીસૃષ્ટિસુન્દરી ।
જમ્બુપ્રિયા જમ્બુવેશી જપેશી જપસુન્દરી ॥ ૭૪॥

જીવદા જિવવરદા જીવેશી જીવસુન્દરી ।
ૐ હ્રીં કાઙ્કારિણી શ્રોતિર્લેખાકાઙ્કારસુન્દરી ॥ ૭૫॥

ઝિલ્લી ધનુર્જ્યા જ્યાઘાતા ઝકારાનન્દસુન્દરી ।
ૐ શ્રીં ઞાનુતનુર્ઞન્તા ઞકારાકારસુન્દરી ॥ ૭૬॥

ૐ ઐં સૌઃ ટઙ્કહસ્તા ચ ટઙ્કેશી ટઙ્કધારિણી ।
ૐ ઠઃ ઠઃ ઠઃ સ્વરૂપાદ્યા ઠકારત્રયસુન્દરી ॥ ૭૭॥

ૐ હ્રીં ડિમ્બાહિડિમ્બા ચ હિડિકા ડિંવસુન્દરી ।
ૐ શ્રીં હ્રાં ઢક્કૃતિ ઢક્કા ઢાકૃતિર્ઢક્કસુન્દરી ॥ ૭૮॥

ૐ હ્રીં ણાત્મપ્રિયા ણાન્તા ણવર્ણાનન્દસુન્દરી ।
ૐ ઐં સ્રીં તટિનીતીર્થા તીર્થેશી તિથિસુન્દરી ॥ ૭૯॥

તારપ્રિયાન્તરી તુર્યા તુર્યેશી તુર્યસુન્દરી ।
ત્રોટિકા તુટિગન્ધાઢ્યા ત્રુટેશી ત્રુટિસુન્દરી ॥ ૮૦॥

તારાપતિઃ કલા દાત્રી તારા કાન્તારસુન્દરી ।
ત્રેતાયુગેશ્વરી ત્ર્યમ્બા ત્ર્યમ્બકેશ્વરસુન્દરી ॥ ૮૧॥

તલાતલાશ્રયા તાપી તકારાક્ષરસુન્દરી ।
ઐં શ્રીં સ્થૂલારવિન્દાક્ષી સ્થૂલજા જલસુન્દરી ॥ ૮૨॥

સ્થન્ડિલા મણ્ડલાકારા થકારાનન્દસુન્દરી ।
દ્યુતિર્દેવી દયાલુશ્ચ દયારૂપૈકસુન્દરી ॥ ૮૩॥

દરી દ્યુતિમતી દીપ્તા દીપ્તપાવકસુન્દરી ।
દીપ્તાર્ચિર્દીપ્તશીખિની દીપિતા દીપસુન્દરી ॥ ૮૪॥

દમેશ્વરી દમાકક્ષા દમદા દમસુન્દરી ।
દોલાક્રીડા દરી ગુહ્યા દરિદ્રા દારસુન્દરી ॥ ૮૫॥

દારિદ્ર્યશતકોટિઘ્ની દારિદ્રાક્ષરસુન્દરી ।
ૐ સૌંઃ સૌ ધનદા ધર્મ્યા ધર્મેષ્ટા ધર્મસુન્દરી ॥ ૮૬॥

ધન્યા ધન્યજનસ્તુત્યા ધર્મિણી ધાતૃસુન્દરી ।
ધનદૈકપ્રિયા ધાત્રી ધરિત્રી ધીરસુન્દરી ॥ ૮૭॥

ધર્મકર્મપ્રિયા ધીરા ધીરવીરૈકસુન્દરી ।
ઓં ક્ષ્રીં નારાયણી નીવી નૃસિંહી સિંહસુન્દરી ॥ ૮૮॥

નરનારાયણીમૂર્તિર્નર્મકર્મૈકસુન્દરી ।
નર્મસાચિવ્યકોલ્લાસા નાદેશી નાદસુન્દરી ॥ ૮૯॥

નટિની નાટકોલ્લાસા નટનર્તનસુન્દરી ।
નર્મદા નલિની નીલા નલિનેક્ષણસુન્દરી ॥ ૯૦॥

ૐ ઐં પ્રીં પરમા પૂતા પોતેશી પોતસુન્દરી ।
પણ્યદા પણયા સાક્ષી પણ્યશ્રી પણ્યસુન્દરી ॥ ૯૧॥

પરાન્ત્રિકા પરોલ્લાસા પીવરા પીનસુન્દરી ।
ફટ્કારા ચ વષટ્કારા ફલદા ફલસુન્દરી ॥ ૯૨॥

ફટ્ સ્વરૂપા ફડાકારા ફટ્ વર્ણામૃતસુન્દરી ।
ૐ ઐં બાલેશ્વરી બભ્રુર્બલર્દ બલસુન્દરી ॥ ૯૩॥

બલિદાનવયક્ષેશી બલિભુક્યતિસુન્દરી ।
ૐ શ્રીં ભૈં ભદ્રકાલી ચ ભદ્રદા ભદ્રસુન્દરી ॥ ૯૪॥

ૐ હ્રીં ભર્ગશિખા ભાર્ગી ભાર્ગવેશ્વરસુન્દરી ।
ભર્ગ્યા ભર્ગાઙ્ગવસતિર્ભર્ગાખ્યાભર્ગસુન્દરી ॥ ૯૫॥

ભગલિઙ્ગામૃતપ્રીતા ભગલિઙ્ગૈકસુન્દરી ।
ભગાનન્દા ભગોલ્લાસા ભગેશી ભગસુન્દરી ॥ ૯૬॥

ભગોત્તમા ભગાનન્દા ભગાનન્દૈકસુન્દરી ।
ભગલિઙ્ગામૃતસ્નાતા ભગવિર્વૈકસુન્દરી ॥ ૯૭॥

ભગબિમ્બા ભગાદ્યા ચ ભોગેશી ભોગસુન્દરી ।
ભોગાપવર્ગદા ભાગ્યા ભગસ્થા ભીમસુન્દરી ॥ ૯૮॥

ભીમનાદા ભીમરદા ભીમહા ભીમસુન્દરી ।
ૐ શ્રીં મૃત્તિકા મૃત્સ્ના માર્જારી મૃડસુન્દરી ॥ ૯૯॥

મીના મૈનાકભગિની માણિકેશ્વરસુન્દરી ।
મહોરસ્કા મહીમધ્યા માધવી મધુસુન્દરી ॥ ૧૦૦॥

મધુમત્તા મહાજ્યોતિર્મેરુસ્થા મેરુસુન્દરી ।
મધુક્ષીબા મદારક્તા મદ્દેશી મધુસુન્દરી ॥ ૧૦૧॥

ૐ શ્રીં યોગપ્રિયા યોગ્યા યોગેશી યોગસુન્દરી ।
ૐ યજ્ઞદક્ષિણા વાજ્યા ૐ યક્ષૈશ્વર્યસુન્દરી ॥ ૧૦૨॥

ૐ યક્ષવેગનિલયા યક્ષવેલૈકસુન્દરી ।
યમેષ્ટા યમદા યાત્રા યમૈશ્વર્યાદિસુન્દરી ॥ ૧૦૩॥

યમિની યામિની યામ્યા યામવેલૈકસુન્દરી ।
યોગિયોગફલા યાદોનાથેષ્ટા નાથસુન્દરી ॥ ૧૦૪॥

યાના યાનરસા યષ્ટિર્યાકારોલ્લાસસુન્દરી ।
ૐ રાં રસાતલસ્થા ચ રસદા રાસસુન્દરી ॥ ૧૦૫॥

રસસ્વાતા રૈવતકી રેવા રૈવતસુન્દરી ।
રવિકોટિપ્રભા દીપ્તી રવિજા રવિસુન્દરી ॥ ૧૦૬॥

રાક્ષસી રક્ષસાં રક્તા રાણી રાક્ષસસુન્દરી ।
રજોવતી રાણસિકી રાકા રાક્ષરસુન્દરી ॥ ૧૦૭॥

ૐ હ્રીં શ્રીં લમ્બકેશા લમ્બોષ્ઠી લમ્બસુન્દરી ।
લમ્બોદરપ્રિયા લમ્ભ્યા લગ્ચા લાઙ્ગૂલસુન્દરી ॥ ૧૦૮॥

લલદ્દંસા લલન્નેત્રા લાલિતા લલ્લિસુન્દરી ।
લોહિતાક્ષી લલન્મૂર્તિર્લોહિતા લોહિતેશ્વરી ॥ ૧૦૯॥

લોહિતામ્બરભૂષાઢ્યા લકારામૃતસુન્દરી ।
ૐ વાં વનેચરપ્રિયા વેદિકા વેદસુન્દરી ॥ ૧૧૦॥

વલિતા વાલિજનની વાલુકા વાલિસુન્દરી ।
વરપ્રિયા વરોલ્લાસા વારિણી વારિસુન્દરી ॥ ૧૧૧॥

વરજ્યેષ્ઠા કાનિષ્ઠા ચ વાલુપ્તા લુપ્તસુન્દરી ।
વ્યોમગા વારિધિસુતા વરાકાનન્દસુન્દરી ॥ ૧૧૨॥

ૐ શ્રીં શશિસહસ્રાભા શીતઙ્ગા શઙ્કરપ્રિયા ।

શૌત્યપ્રિયા શતાનન્દા શતગા શીતસુન્દરી ॥ ૧૧૩॥

શતયજ્ઞૈકવરદા શતયક્ષૈકસુન્દરી ।
શતક્રતુપ્રિયા શર્મદાયિની શક્રસુન્દરી ॥ ૧૧૪॥

શિવપ્રિયા શૂલહસ્તા શુક્રેશી શુક્રસુન્દરી ।
શોકહાડશોકમાલાઢ્યા શુક્લા શોકૈકસુન્દરી ॥ ૧૧૫॥

શુક્લવાસા શુક્લમુખી શકારાક્ષરસુન્દરી ।
ૐ શ્રીં ષડક્ષરા ષટ્ષડ્વર્ણા ખાવર્ણસુન્દરી ॥ ૧૧૬॥

ષોડશી ષોડશકલા ષોડશાર્ણાર્ણસુન્દરી ।
ૐ ઐં સૌઃ સાત્ત્વિકી સીતા સરલા સીરસુન્દરી ॥ ૧૧૭॥

સુક્માલા સનયા સૌમ્યા સૌમ્યેશી સૌમ્યસુન્દરી ।
સુસ્વરા સુનકાધ્યક્ષા સનકાધ્યર્ષિસુન્દરી ॥ ૧૧૮॥

સમસ્તનરકત્રાતા સમસ્તનરસુન્દરી ।
સમસ્તભયહા દેવી સમસ્તાભયસુન્દરી ॥ ૧૧૯॥

સમસ્તજયદા જ્વાલા જ્વાલામણ્ડલસુન્દરી ।
સૌઃ સૌઃ સૌઃ સૌઃ સ્વમન્ત્રાસ્વ સૌઃમન્ત્રાક્ષરસુન્દરી ॥ ૧૨૦॥

ૐ હ્રીં હરિહરેશાની હરેશી હરસુન્દરી ।
હરપત્ની હવિર્જ્વાલા હવ્યાઢ્યા હરસુન્દરી ॥ ૧૨૧॥

હોતૃસેવ્યા હકારાદ્યા હ્રીઙ્કારાક્ષરસુન્દરી ।
ૐ ક્ષ્માં ક્ષ્માયતી ક્ષીવા ક્ષાન્તા ક્ષીરાર્ણવસ્થિતા ॥ ૧૨૨॥

ક્ષિરાંવુધિપ્રિયાક્ષેષ્ટા ચાક્ષેશી ક્ષીરસુન્દરી ।
ક્ષીરાબ્ધિતનયા ક્ષાન્તા ક્ષકારામૃતસુન્દરી ॥ ૧૨૩॥

અકારાદિક્ષકરાન્તા લક્ષતત્ત્વાદિસુન્દરી ।
બ્રાહ્મી ચ વૈષ્ણવી ચૈશી બ્રહ્મેષ્ટા બ્રહ્મસુન્દરી ॥ ૧૨૪॥

નવતત્ત્વપ્રકાશાઢ્યા નૂતના વિષ્ણુસુન્દરી ।
નવપીઠનિવાસસ્થા શિવદા શિવસુન્દરી ॥ ૧૨૫॥

નવેન્દ્રિયૈકનિલયા શિવદા શિવસુન્દરી ।
નવગાથારસાકાઙ્ક્ષા ગાથા ગગનસુન્દરી ॥ ૧૨૬॥

નવરત્નવિભૂષાઢ્યા બ્રહ્મા બ્રહ્માણ્ડસુન્દરી ।
નવદ્વીપૈકવસતિઃ પીતા પાતાલસુન્દરી ॥ ૧૨૭॥

નવપન્નગહારાઢ્યા પ્રાન્તા પન્નગસુન્દરી ।
નવમાતૃક્રમોલ્લાસા નાવ્યા નક્ષત્રસુન્દરી ॥ ૧૨૮॥

નવપર્વતપ્રસ્થસ્થા નવમન્ત્રાઙ્ગુસુન્દરી ।
અકચાદિ ઋતોન્નદ્ધપયશાક્ષરકર્મિણી ॥ ૧૨૯॥

તલાતલાદિપાતાલચારીણી સર્વસુન્દરી ।
ૐ હ્રીં શ્રીં ઐં સૌઃ ક્લીં દેવી ફટ્ સ્વાહેન્દ્રાક્ષિણી પરા ॥ ૧૩૦॥

ફલશ્રુતિઃ ।
ઇતીન્દ્રાક્ષ્યાઃ પરં નામ્નાં સહસ્રં શિવભાષિતમ્ ।
સર્વમન્ત્રૈકનિલયં સુન્દરીતિ મનુપ્રિયમ્ ॥ ૧૩૧॥

નવતત્ત્વમયં દિવ્યં બ્રહ્માણ્ડાન્તં સુધામયમ્ ।
ભોગાપવર્ગદં પુણ્યં સર્વતીર્થૈકસાધનમ્ ॥ ૧૩૨॥

બલદં સર્વદા શાન્તં ગ્રહાણાં શાન્તિકૃત્પરમ્ ।
સર્વરોગભયહરં સર્વદેવપ્રિયં મહત્ ॥ ૧૩૩॥

ભૂતપ્રેતપિશાચાદિયક્ષરાક્ષસભીતિષુ ।
પઠેદ્વા પાઠયેન્નામ્નાં સહસ્રં મન્ત્રગર્ભિકમ્ ॥ ૧૩૪॥

દૂરાદેવ પલાયન્તે ખગેશાદિવ પન્નગાઃ ।
કુષ્ઠાદયો મહારોગાઃ શમમેષ્યન્ત્યસંશયમ્ ॥ ૧૩૫॥

સાધકસ્ય સદા પુણ્યવર્ધનં ધનવર્ધનમ્ ।
સર્વકાલૈકફલદં સર્વમન્ત્રૈકસાધનમ્ ॥ ૧૩૬॥

ભૂર્જત્વચિ લિખેન્મન્ત્રં સૂર્યવારે ચ સાધકઃ ।
ગોરોચનૈઃ કુઙ્કુમેન ધારયેત્સવ્યકે ભુજે ॥ ૧૩૭॥

ઇન્દ્રાદ્યા નિર્જરાઃ સર્વે રાવણાદ્યા નિશાચરાઃ ।
સમ્યુગે ચ જિત્વા ધૃત્વા નામ્નાં સહસ્રમુત્તમમ્ ॥ ૧૩૮॥

રામભદ્રેણ સહસા વિષ્ણુના દૈત્યપુઙ્ગવાઃ ।
ભૌમેઽષ્ટમ્યાં શ્મશાને ચ પઠેન્નામ્નાં સહસ્રકમ્ ॥ ૧૩૯॥

જપેદષ્ટોત્તરશતં દેવ્યાઃ પર્ષદ્વરો ભવેત્ ।

અમાવસ્યાં નિશીથે ચ રવૌ નામ્નાં સહસ્રકમ્ ॥ ૧૪૦॥

પઠિત્વા પુલિને નદ્યાઃ બૃહસ્પતિસમો ભવેત્ ।
સ્તમ્ભયેદ્રિપુસૈન્યાદિદસ્યુવાદિમુખાનિ ચ ॥ ૧૪૧॥

મોહયેત્પરમેશાનં વશયેદ્ભુવનત્રયમ્ ।
મારયેદ્રિયુસઙ્ઘાતં સાધયેન્મન્ત્રસઞ્ચયમ્ ॥ ૧૪૨॥

આકર્ષયેદશ્મરસ ઉચ્ચાટયતિ વૈરિણઃ ।
પઠનાચ્છ્રવણાત્સત્યં ધારણાત્સાધકોત્તમઃ ॥ ૧૪૩॥

ઇહલોકે સુખં ભુક્ત્વા પરત્ર ત્રિદિવં વ્રજેત્ ।
ત્રિસન્ધ્યં યઃ પઠેદ્ભૌમે ત્રિસ્ત્રિવારં શુચિવ્રતઃ ॥ ૧૪૪॥

ભૂમિશાયી સુધીર્દેવીં દર્શયેદ્વરદાયિનીમ્ ।
રણે રાજભયે કુઞ્જે ઘોરદાવાગ્નિભીતિષુ ॥ ૧૪૫॥

પયોધૌ પોતવાયૌ વા સઙ્કટે રાજસન્નિધૌ ।
ચૌરભીતિષુ દુર્ગેષુ સિંહશ્વાપદભીતિષુ ॥ ૧૪૬॥

પઠેન્નામ્નાં સહસ્રન્તુ સાધકો મુચ્યતે ભયાત્ ।
પ્રભાવમસ્યા નામ્નાં તુ સહસ્રસ્યૈહ વર્ણિતુમ્ ॥ ૧૪૭॥

ન ચ શક્નોમિ શક્તોઽપિ શેષા હિ વિફલં પદમ્ ।
અલં વિસ્તરમાત્રેણ યઃ પઠેત્સાધકોત્તમઃ ॥ ૧૪૮॥

વિચરેદ્ભુવનેષ્વેકો યથાહં ભૈરવોત્તમઃ ।
ઇતિ નામ્નાં સહસ્રં તુ સર્વમન્ત્રૈકરૂપિણમ્ ॥ ૧૪૯॥

ઇન્દ્રાક્ષ્યઃ સર્વસર્વસ્વં રહસ્યં સ્વર્ગવાસિનામ્ ।
સર્વાર્થસાધનં લોકે સર્વતન્ત્રાગમાર્ણવમ્ ॥ ૧૫૦॥

ગુહ્યં ગુપ્તં સદા ગોપ્યં ગોપ્તવ્યં પશુસઙ્કટે ।
ગૃહિણાં યોગદં નિત્યં યોગિનાં મુક્તિદં સદા ॥ ૧૫૧॥

ઇન્દ્રાક્ષ્યા વજ્રહસ્તાયા નામ્નાં સહસ્રકં પરમ્ ।
ગુહ્યાતિગુહ્યગોપ્તવ્યં ગોપનીયં સ્વયોનિવત્ ॥ ૧૫૨॥

ઇતિ શ્રીરુદ્રયામલે તન્ત્રે ઇન્દ્રાક્ષીનામસહસ્રં સમાપ્તમ્ ॥

Encoded by Sivakumar Thyagarajan Iyer

Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

*Shri Indrakshi Sahasranama Stotram*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*